✧˖°˖☆*❋ ❋*☆˖°˖✧

# सिद्ध कुञ्जिका स्तोत्रम्
# (Siddha Kunjika Stotram)
## in Gujarati

## સિધ્ધ કુંજિકા સ્તોત્રમ્

✧˖°˖☆*❋ ❋*☆˖°˖✧

# સિધ્ધ કુંજિકા સ્તોત્રમ્

ઓં અસ્ય શ્રીકુંજિકાસ્તોત્રમંત્રસ્ય સદાશિવ ઋષિઃ, અનુષ્ટુપ્ છંદઃ,
શ્રીત્રિગુણાત્મિકા દેવતા, ઓં ઐં બીજં, ઓં હ્રીં શક્તિઃ, ઓં ક્લીં કીલકમ્,
મમ સર્વાભીષ્ટસિદ્ધ્યર્થે જપે વિનિયોગઃ ।

શિવ ઉવાચ
શૃણુ દેવિ પ્રવક્ષ્યામિ કુંજિકાસ્તોત્રમુત્તમમ્ ।
યેન મંત્રપ્રભાવેણ ચંડીજાપઃ શુભો ભવેત્ ॥ 1 ॥

ન કવચં નાર્ગલાસ્તોત્રં કીલકં ન રહસ્યકમ્ ।
ન સૂક્તં નાપિ ધ્યાનં ચ ન ન્યાસો ન ચ વાર્ચનમ્ ॥ 2 ॥

કુંજિકાપાઠમાત્રેણ દુર્ગાપાઠફલં લભેત્ ।
અતિ ગુહ્યતરં દેવિ દેવાનામપિ દુર્લભમ્ ॥ 3 ॥

ગોપનીયં પ્રયત્નેન સ્વયોનિરિવ પાર્વતિ ।
મારણં મોહનં વશ્યં સ્તંભનોચ્ચાટનાદિકમ્ ।
પાઠમાત્રેણ સંસિદ્ધ્યેત્ કુંજિકાસ્તોત્રમુત્તમમ્ ॥ 4 ॥

અથ મંત્રઃ ।
ઓં ઐં હ્રીં ક્લીં ચામુંડાયૈ વિચ્ચે ।
ઓં ગ્લૌં હું ક્લીં જૂં સઃ જ્વાલય જ્વાલય જ્વલ જ્વલ પ્રજ્વલ પ્રજ્વલ
ઐં હ્રીં ક્લીં ચામુંડાયૈ વિચ્ચે જ્વલ હં સં લં ક્ષં ફટ્ સ્વાહા ॥ 5 ॥
ઇતિ મંત્રઃ ।

નમસ્તે રુદ્રરૂપિણ્યૈ નમસ્તે મધુમર્દિનિ ।
નમઃ કૈટભહારિણ્યૈ નમસ્તે મહિષાર્દિનિ ॥ 6 ॥

નમસ્તે શુંભહંત્ર્યૈ ચ નિશુંભાસુરઘાતિનિ ।
જાગ્રતં હિ મહાદેવિ જપં સિધ્ધં કુરુષ્વ મે ॥ 7 ॥

ઐંકારી સૃષ્ટિરૂપાયૈ હ્રીંકારી પ્રતિપાલિકા ।
ક્લીંકારી કામરૂપિણ્યૈ બીજરૂપે નમોડસ્તુ તે ॥ 8 ॥

ચામુંડા ચંડઘાતી ચ યૈકારી વરદાયિની ।
વિચ્ચે ચાભયદા નિત્યં નમસ્તે મંત્રરૂપિણિ ॥ 9 ॥

ધાં ધીં ધૂં ધૂર્જટેઃ પત્ની વાં વીં વૂં વાગધીશ્વરી ।
ક્રાં ક્રીં ક્રૂં કાલિકા દેવિ શાં શીં શૂં મે શુભં કુરુ ॥ 10 ॥

હું હું હુંકારરૂપિણ્યૈ જં જં જં જંભનાદિની ।
ભ્રાં ભ્રીં ભ્રૂં ભૈરવી ભદ્રે ભવાન્યૈ તે નમો નમઃ ॥ 11 ॥

અં કં ચં ટં તં પં યં શં વીં દું ઐં વીં હં ક્ષમ્ ।
ધિજાગ્રં ધિજાગ્રં ત્રોટય ત્રોટય દીપ્તં કુરુ કુરુ સ્વાહા ॥ 12 ॥

પાં પીં પૂં પાર્વતી પૂર્ણા ખાં ખીં ખૂં ખેચરી તથા ।
સાં સીં સૂં સપ્તશતી દેવ્યા મંત્રસિધ્ધિં કુરુષ્વ મે ॥ 13 ॥

કુંજિકાયૈ નમો નમઃ ।

ઇદં તુ કુંજિકાસ્તોત્રં મંત્રજાગર્તિહેતવે ।
અભક્તે નૈવ દાતવ્યં ગોપિતં રક્ષ પાર્વતિ ॥ 14 ॥

યસ્તુ કુંજિકયા દેવિ હીનાં સપ્તશતીં પઠેત્ ।
ન તસ્ય જાયતે સિદ્ધિરરણ્યે રોદનં યથા ॥ 15 ॥

ઇતિ શ્રીરુદ્રયામલે ગૌરીતંત્રે શિવપાર્વતીસંવાદે કુંજિકાસ્તોત્રં સંપૂર્ણમ્ ।

✧ₓ┈┈°*❋ ❋*°┈┈ₓ✧